# AMRITA VIDYALAYAM

## ANNUAL EXAMINATION 2018 - '19

**Class : IX** **Marks : 80**
**Time : 3 hrs**

# संस्कृतम्

निर्देशा:
अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति।
प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
खण्ड: क - अपठित अवबोधनम् - 5
खण्ड: ख - रचनात्मक कार्यम् - 15
खण्ड: ग - अनुप्रयुक्त व्याकरणम् - 25
खण्ड: घ - पठित अवबोधनम् - 35

## खण्ड: क - अपठित अवबोधनम्

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

श्रीमदनमोहनमालवीयस्य जन्म प्रयागेऽभवत्। अस्य पिता श्री व्रजनाथ: संस्कृतविद्वान् आसीत्। प्रयागे बी.ए. परीक्षामुत्तीर्य मदनमोहन: अध्यापकोऽभवत्। पश्चात् स: पत्रस्य सम्पादक: अभवत्। संभाषणे स: अतिपटु: आसीत्। कालान्तरे स: स्वतन्त्रता - संग्रामे कारावासं प्राप्तवान्। राजनीतौ स: प्रसिद्ध: आसीत्। शिक्षायामपि स: पारंगतोऽभवत्। वारणस्यां स: हिंदु - विश्वविद्यालयस्य स्थापनमकरोत्। अस्य सञ्चालनाय स: कोटिश: रूप्यकाणि संगृहीतवान्। स: जनै: महामना इति ख्यात:।

**I. एकपदेन उत्तरत।** **1**

क. राजनीतौ क: प्रसिद्ध: आसीत्?
ख. हिंदु - विश्वविद्यालयस्य स्थापनां स: कुत्र अकरोत्?

**II. पूर्णवाक्येन उत्तरत।** **2**

क. विश्वविद्यालयस्य सञ्चालनाय स: किं कृतवान्?
ख. मदनमोहनमालवीय: कस्मिन् पटु: आसीत्?

**III. भाषिककार्यम्।** **2**

क. गद्यांशे 'निपुण:' इति पदस्य समानार्थकं पदं किम्?
ख. अस्य सञ्चालनाय .........। अत्र 'अस्य' इति पदं कस्मै प्रयुक्तम्?
ग. प्राप्तवान् इति क्रियापदस्य कर्तृपदं किम्?
घ. गद्यांशे 'शिष्य:' इति पदस्य विलोमपदं किम्?

## खण्डः ख – रचनात्मकं कार्यम्

2. **भवान् पर्यावरणस्य रक्षणार्थं किं किं कतुम् इच्छति इति अधिकृत्य स्वक्षेत्रस्य पर्यावरणाधिकारिणं प्रति लिखितं पत्रं मञ्जुषापदैः पूरयित्वा पुनः लिखत।** 5

(प्रयोगः, फलदायकम्, जलशुद्धिः, पर्यावरणस्य, चर्चा, रक्षणाय, सफलाः, सहयोगम्, अवकरः, निवारयितुम्)

54, श्रीरामपुरम्
वसुन्धरा एनक्लेव
दिल्ली – 96
दिनाङ्कः – 21.12.2018
माननीयः पर्यावरणाधिकारी

सेवायां निवेदनम् अस्ति यत् अस्माकं क्षेत्रस्य (क) -------- रक्षणाय अहं भवतां (ख) --------- इच्छामि। महानगरेषु वर्धमानं प्रदूषणं दृष्ट्वा पर्यावरणस्य (ग) ----------- उपायानां विषये विभिन्नगोष्ठ्याम् (घ) ---------- भवेयुः। जनाः गृहात् बहिः (ङ) ------- न क्षेपणीयाः। जलप्रदूषण – निवारणाय समये – समये (च) -------- करणीयाः। जनाः निजगृहेषु अपि एकं (छ) --------- वृक्षं आरोपयन्तु। ध्वनिप्रदूषणं (ज) ---------- ध्वनिप्रसारकयन्त्राणां न्यूनतमः (झ) ------- करणीयः। आशसे, भवत्सहयोगेन ईदृशाः प्रयासाः (ञ) -------- भवेयुः इति प्रयत्नः करणीयः।

सधन्यवादः
भवदीयः
अभिषेकः

3. **अधोदत्तं चित्रं दृष्ट्वा संस्कृतेन पञ्चवाक्यानि लिखत।** 5

(महाभारतम्, श्रीकृष्णः, अर्जुनाय, युध्दसमये, उपदेशान्, मोहात्, ददाति, कर्तव्यपालनम्, युद्धाय, सन्नद्धः)



**4. संस्कृतभाषायाम् अनुवादं कुरुत।** 5

क. You both read books.

ख. A boy brought water.

ग. Children are laughing.

घ. The runner is running.

ङ. The river is flowing.

## खण्डः ग – अनुप्रयुक्तव्याकरणम्

**5. संस्कृतवर्णमाला।**

**अ. अधोलिखितयोः शब्दयोः उचितवर्णसंयोजनं विन्यासं वा लिखत।** 1

क. स् + व् + आ + र् + थ् + आ + न् + ध् + अः = -----------

ख. प्रयच्छति = -----------

**आ. उच्चारणस्थानानि।** 2

क. 'यदि' इति शब्दे कः वर्णः दन्त्यः अस्ति?

ख. हकारस्य उच्चारणस्थानं किम्?

**6. रेखाङ्कितानां शब्दानां सन्धिं सन्धिविच्छेदं वा लिखत।** 4

क. त्वं मामुपेक्ष्य कुत्र गच्छसि?

ख. सः विद्यालयात् कथमागतः?

ग. पुरुषार्थैरेव लक्ष्यं प्राप्यते।

घ. राज्ञः प्रत्यवदत्।

**7. उचित शब्दैः रिक्तस्थानानि पूरयत।** 6

क. शोभनः बालकः प्रातः ------ नमति। (मात्रे, मातुः, मातरम्)

ख. ------ गतिः तीव्रा भवति। (वायोः, वायुः, वायुना)

ग. फलानि ------ पतन्ति। (वृक्षात्, वृक्षस्य, वृक्षेण)

घ. ------ बालिके तरणताले तरतः। (इदम्, इमौ, इमे)

ङ. वाटिकायां ------- मित्रे वार्तालापं कुरुतः। (द्वे, द्वौ, द्वि)

च. उद्याने ------ लताः सन्ति। (चत्वारि, चत्वारः, चतस्रः)

**8. कोष्ठके प्रदत्तधातूनाम् उचितैः रूपैः रिक्तस्थानानि पूरयत।** 3

क. शकुन्तला आश्रमे पुष्पाणि ----------। (चि, लट्)

ख. अनुशासनबद्धः बालः यथाकालं सर्वं कार्यं कर्तुं ----------। (शक्, लट्)

ग. त्वं ध्यानेन परीक्षां ---------। (लिख्, लोट्)

**9. उचितं विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत।** 4

क. इमं --------- परितः राजपथं वर्तते। (विद्यालय)

ख. --------- मा प्रमद। (स्वाध्याय)

ग. कृष्णः --------- अलम्। (कंस)

घ. --------- हीनः पशुभिः समानः। (विद्या)

**10. प्रकृति प्रत्ययं संयोज्य वा विभज्य रिक्तस्थानानि पूरयत।** 3

क. प्रदर्शिनीं ------------ वयं गमिष्यामः। (दृश् + तुमुन्)

ख. छात्रः ------------ गुरुं प्रणमति। (नत्वा)

ग. अहं ------------ आपणं प्रविशामि। (पठित्वा)

**11. उपसर्गं संयोज्य वा विभजय रिक्तस्थानानि पूरयत।** 2

क. वयं नियमान् ------------। (परि + पाल् + लट्)

ख. कृषकः क्षेत्रात् -----------। (आ, गम्, लङ्)

## खण्डः घ - पठित अवबोधनम्

**12. अधोलिखितं गद्यांशं, नाट्यांशं च पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

**अ. गद्यांशः**

धर्मो रक्षति रक्षितः इत्यार्षवचनम्। पर्यावरणरक्षणमपि धर्मस्यैवाङ्गमिति ऋषयः प्रतिपादितवन्तः। तत एव वापीकूपतडागादि निर्माणं देवायतनविश्रामगृहादिस्थापनञ्च धर्मसिद्धेः स्त्रोतोरूपेणाङ्कीकृतम्। कुक्कुरसूकर सर्पनकुलादिस्थलचराः, मत्स्यकच्छपमकरप्रभृतयो जलचरश्चापि रक्षणीयाः। यतस्ते स्थलमलापनोदिनो जलमलापहारिणश्च। प्रकृतिरक्षयैव संभवति लोक रक्षेति न संशयः।

**I. एकपदेन उत्तरत।** 2

क. कुक्कुरसूकरसर्पनकुलादयः के सन्ति?

ख. जलचराः के सन्ति?

**II. पूर्णवाक्येन उत्तरत।** 2

ऋषयः किम् प्रतिपादितवन्तः?

**III. भाषिककार्यम्।** 2

क. 'मन्दिरम्' इत्यर्थे अत्र किं पदं प्रयुक्तम्?

ख. 'धर्मः' इति पदस्य विशेषणपदं किम्?

ग. 'ऋषीणां वचनम्' इत्यस्मिन् अर्थे किं पदं प्रयुक्तम?

घ. 'यतस्ते' इति पदस्य सन्धिविच्छेदं कुरुत।

**आ. पद्यांशः**

तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः।<br>
चकार बहुधा गत्रे व्रणान्पतगसत्तमः ॥

**I. एकपदेन उत्तरत।** 2

क. महाबलः कः आसीत्?

ख. जटायुः कस्य गात्रे व्रणान् अकरोत्?

**II. पूर्णवाक्येन उत्तरत।** 2

जटायुः किम् अकरोत्?

**III. भाषिककार्यम्।** 2

क. 'शरीरे' इति पदस्य पर्यायपदं किम्?

ख. 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

ग. अस्मिन् श्लोके क्रियापदं किम्?

घ. अस्मिन् श्लोके जटायोः विशेषणमेकं लिखत।

**इ. नाट्यांशः**

पुरुषः - भो स्तपस्विन्! कथं मामुपरुणासि। प्रयत्नेन किं न सिद्धं भवति? कावश्यकता शिलानाम्? सिकताभिरेव सेतुं करिष्यसि? स्वसंकल्पदृढतया।

तपोदत्तः - आश्चर्यम्। सिकताभिरेव सेतुं करिष्यसि? सिकता जलप्रवाहे स्थास्यन्ति किम्? भवता चिन्तितं न वा।

पुरुषः - (सोत्प्रासम्) चिन्तितं चिन्तितम्। सम्यक् चिन्तितम्। नाहं सोपानमार्गैः अट्टमधिरोढुं विश्वसिमि। समुत्प्लुत्यैव गन्तुं क्षमोऽस्मि।

तपोदत्तः - (सव्यङ्ग्यम्) साधु साधु! आञ्चनेयमप्यतिक्रामसि।

पुरुषः - (सविमर्शम्) कोऽत्र सन्देहः?

**I. एकपदेन उत्तरत।** **2**

क. पुरुषः काभिः एव सेतोः निर्माणं करोति?

ख. केन सर्वं सिद्धं भवति?

**II. पूर्णवाक्येन उत्तरत।** **2**

पुरुषः कस्मिन् न विश्वसिति?

**III. भाषिककार्यम्।** **2**

क. "न अहं सोपानमार्गे ....। अस्मिन् वाक्ये 'अहम्' इति कर्तृपदस्य क्रियापदं किम्?

ख. 'अवरोधं करोषि' इति पदस्य समानार्थकपदं किम्?

ग. एकं अव्ययपदं चित्वा लिखत।

घ. 'सिकताभिरेव' इति पदस्य सन्धिविच्छेदं कुरुत।

**13. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत।** **5**

क. श्रेष्ठिनः शिशुः स्नानोपकरणमादाय अभ्यागतेन सह प्रस्थितः।

ख. तपोदत्तः अक्षरज्ञानं विनैव वैदुष्यमवाप्तुम् अभिलषति।

ग. वृक्षकर्तनात् शुद्धवायुः न प्राप्यते।

घ. श्वेतकेतुः सर्वप्रथमम् आरूणिं मनसः स्वरूपस्य विषये पृच्छति।

ङ. गुरुगृहं गत्वैव विद्याभ्यासः करणीयः।

**14. निम्नलिखितपद्यद्वयस्य अन्वयं पूरयित्वा पुनः लिखत।** **4**

क. ततः पर्वतशृङ्गाभस्तीक्ष्णतुण्डः खगोत्तमः।
वनस्पतिगतः श्रीमान् व्याजहार शुभां गिरम् ॥

अन्वयः - ततः ------------ तीक्ष्णतुण्डः ----------- वनस्पतिगतः ---------- शुभां गिरम् ---------- ॥

ख. न ते क्षेपेण रुष्यामि, रुष्यता भवता रमे।

किमुक्त्वा नापराध्दोऽहं, कथं तिष्ठति यत्विति ॥

अन्वयः - रुष्यता ------- रमे! ते -------- न रुष्यामि, किं ---------

अहं --------- कथं तिष्ठति, यातु इति।

**15. घटनाक्रमानुसारं लिखत।** **4**

क. "तदर्पय मे तुलाम्, यदि दारकेण प्रयोजनम्" इति।

ख. ततः स श्रेष्ठी सभ्यानमग्रे आदितः सर्वं वृत्तान्तं निवेदयामास।

ग. स च विभवक्षयाद्देशान्तरं गन्तुमिच्छन् व्यचिन्तयत्।

घ. पश्यतो मे नदीतटाच्छ्येनेन अपहृतः शिशुः।

ङ. "कथ्यतां कुत्र मे शिशुर्यस्त्वया सह नदीं गतः"?

च. परमहं नद्यां स्नानार्थं गमिष्यामि।

छ. भोः श्रेष्ठिन्। दीयतां मे सा निक्षेपतुला।

ज. स आह - "नदीतटात्स श्येनेन हृतः" इति।

**16. अधोलिखित वाक्येषु रेखाङ्कितपदानां कृते उचितम् अर्थं चित्वा लिखत।** **4**

क. <u>व्यपनयतु</u> भवाञ्छङ्काम्।

(व्ययीकरोतु, दूरीकरोतु, गच्छतु)

ख. पृष्टश्च तेन <u>वणिजा</u>।

(वाणिना, वीणावादी, व्यापारिणा)

ग. <u>क्षिप्रं</u> वैदेहीं च ददर्श सः।

(कोपः, शीघ्रम्, मन्दम्)

घ. भूय एव मां <u>विज्ञापयतु</u>।

(प्रबोधयत, विचार्यत, उत्थापयत)